## मतौ बह्वचोऽनजिरादीनाम्। (११९/१०४१)

मतौ परतो बह्वचोऽजिरादिवर्जितस्य दीर्घो भवति सञ्ज्ञायां विषये। उदुम्बरावती। [1]मशकावती। वीरणावती। पुष्करावती। [2]अमरावती। '[3]नद्यां मतुप्' (४.२.८५/१३०४) इति मतुप्प्रत्ययः। 'सञ्ज्ञायाम्' (८.२.११/१८९९) इति मतोर्वत्वम्। बह्वचः इति किम्? व्रीहिमती। अनजिरादीनाम् इति किम्? अजिरवती। खदिरवती। पुलिनवती। हंसकारण्डववती। [4]चक्रवाकवती। सञ्ज्ञायाम् इत्येव, वलयवती[5]॥

## शरादीनां च। (१२०/१०४२)

शरादीनां च मतौ दीर्घो भवति सञ्ज्ञायां विषये। शरावती। वंशावती।

शर। वंश। धूम। अहि। कपि। मणि। [6]मुनि। शुचि। [7]हनु। शरादिः।

'सञ्ज्ञायाम्' (८.२.११/१८९९) इति मतोर्वत्वम्[8]। यवादित्वात् व्रीह्यादिभ्यो न भवति॥

## इको वहेऽपीलोः। (१२१/१०४३)

इगन्तस्य पूर्वपदस्य पीलुवर्जितस्य वहे उत्तरपदे [9]दीर्घो भवति। ऋषीवहम्। [10]कपीवहम्। मुनीवहम्। इकः इति किम्? पिण्डवहम्। अपीलोः इति किम्? पीलुवहम्।

[७७०] अपील्वादीनामिति वक्तव्यम्। (म.भा. ३.१७६)

इह मा भूत्, [11]चारुवहम्। (म.भा. ३.१७६)॥

## उपसर्गस्य घञ्यमनुष्ये बहुलम्। (१२२/१०४४)

उपसर्गस्य घञन्ते उत्तरपदे अमनुष्येऽभिधेये बहुलं दीर्घो भवति। वीक्लेदः। वीमार्गः। अपामार्गः। न च भवति। [12]प्रसेवः। प्रसारः।

[७७१] सादकारयोः कृत्रिमे दीर्घो भवति। (म.भा. ३.१७६)

प्रासादः। प्राकारः। कृत्रिमे इति किम्? प्रसादः। प्रकारः।

[७७२] वेशादिषु विभाषा दीर्घो भवति। (म.भा. ३.१७६)

प्रतिवेशः, [13]प्रतीवेशः। प्रतिरोधः, प्रतीरोधः।

अमनुष्ये इति किम्? [14]निषादो मनुष्यः॥

## इकः काशे। (१२३/१०४५)

इगन्तस्य उपसर्गस्य काशशब्दे उत्तरपदे दीर्घो भवति। नीकाशः। [15]वीकाशः। अनूकाशः। पचाद्यच्-प्रत्ययान्तोऽयं काशशब्दः, न तु घञन्तः। इकः इति किम्? प्रकाशः॥

---

1. नास्ति फ. 2. नास्ति फ. 3. नद्याः ड.फ. 4. नास्ति फ. 5. इति इत्यधिकम् फ, अजिर खदिर पुलिन हंस कारण्डव चक्रवाक अजिरादिः इत्यधिकम् ड. 6–7. नास्ति फ. 8. शरवती भूमिः इत्यधिकम् फ. 9. परतः इत्यधिकम् ह. 10. नास्ति फ. 11. दारुवहम् क.फ.ह. 12. प्रसवः क. 13. नास्ति क. 14. निषदो मनुष्यः ह. 15. वीकाशः – प्रकाशः नास्ति फ.